नं० ४३०२-घ

बालप्रकाशपूर्वाद्वितीयाध्यायः

नं० ४३०२-च

पत्राणि १८

4302

F = 18



बाल० द्वि०
१

श्रीगणेशाय नमः ॥ ॥ अथार्थभावनानिरूपणं। सैव हि सर्ववाक्येषु मीमांसकमते कारकवि
शिष्टरूपेण वाक्यार्थो न नैयायिकवत्संसर्गः। तदुक्तं तद्भूताधिकरणे। भावनैव हि वाक्यार्थः सर्वत्रा
ख्यातवत्तया। अनेकगुणजात्यादिकारकार्थानुरंजितेति। अर्थैकत्वादेकं वाक्यमित्यत्राप्युक्तं। भा
वनैव च वाक्यार्थः स्वकारकविशेषितेति। संसर्गो भेदश्च न वाक्यार्थ इत्युक्तं तत्रैव भाष्ये। भेदः संस
१ र्गो वा वाक्यार्थ इति यदुच्यते तन्न तथाप्येकार्थता न स्यात् बहुषु पदेषु भेदानां संसर्गाणां च बहुत्वादिति। त
द्विवरणं तु वार्त्तिके कृतं। व्यक्तिपदार्थपक्षे सर्वव्यक्तीनां गवादिपदेनैवोपात्तत्वान्न हि शेषशब्दैः शु
क्लादिभिः कृष्णादिव्यवच्छेदमात्रं कर्त्तव्यं तत्संसर्गः पदार्थान्तर्गतत्वान्न वाक्यार्थो भवतीति तदुपस रा०म०
र्जनत्वे तेषां भेदोवगम्यते। स च यथा शुक्लशब्देन गोशब्दस्य कृष्णादिभ्यो भिद्यमानत्वाद्भवति एवं शुक्ल १
शब्दस्यापि गोशब्देनाश्वादिभ्यो व्यावर्तितस्य भवति व्यवच्छेद्यानानात्वाच्च नास्त्येकवाक्यत्वप्रमाणं।

गोत्व॰

भेदसामान्यग्रहणे वा सर्वथा वाक्यार्थैकत्वप्रसंग इति। तथाकृतिपदार्थपक्षे शुक्लत्वयोः स्वरूपेणाभिहित
२ योः संनिधानादितरेतरानुरंजनादर्थसिद्धो भेदो न वाक्यार्थः स च गोत्वे शुक्लत्वसंसर्गः शुक्लत्वे च गोत्व
संसर्गः सामस्त्येनैकवाक्यत्वोपसंहारादुपलभ्यत इति नाना। यद्यपि च कथंचिद्द्विपदे स एवोभयत्रापि सं
सर्ग इत्येकत्वं गम्येत तथापि बहुपदे येन येन प्रदेशेन पदद्वयं संस्पृश्यते तेन तेन तत्संसर्गरूपोपल
ब्धेरनेकत्वमिति। सा च भावना सर्वैः पदैः कारकविशिष्टत्वेन लक्ष्यते तत्रैकैककारकविशिष्टत्वेन तत्त
त्कारकपदैः। क्रियापदेन तु सर्वकारकविशिष्टत्वेन। तदुक्तं भावार्थाधिकरणे। यदि हि धर्मस्य स्वरूपमभिधी
येत ततः किं पदेन पदेनोच्यत इति विचारो युज्येत लाक्षणिकत्वे त्वयुक्तमिति। वाक्यार्थो लक्ष्यमाणो हि स
र्वत्रैवेति नः स्थितिरिति च। लक्षणा च पदार्थधर्मो न पदधर्मः। तदुक्तं। तेन तत्त्वाश्रितव्यक्तेः क्रियासंब
न्धचोदनेति। तच्छब्देनाकृतिः परामृश्यते। तथा न्यायसुधाकृताप्यर्थवादाधिकरणे लिङः प्रवर्तनासामा

बाल० द्वि० न्येशक्तिमुपपाद्योक्तंप्रवर्त्तनासामान्यस्यवाच्यत्वेवगतेऽन्नहिविशेषाकांक्षायांप्रैषादीनांपुरुषधर्माणांवेद
२ नुपपत्तेस्तद्धिलक्षणांविशेषांतरमभिधेयेनसामान्येनविधिप्रेरणानियोगाख्यंलक्ष्यतइति। अत्रवाच्य
प्रवर्त्तनासामान्यधर्मएवलक्षणीयस्तुक्तंनशब्दधर्मइति। सेयंवाक्यार्थभूताभावनार्थभावनेतिगीयतेअ
र्थ्यतइत्यर्थःफलकामःपुरुषस्तद्धर्मत्वात्साचप्रयत्नरूपैवरथोगच्छतीत्यादौचलक्षणेतिभट्टसोम
2 श्वरोभावार्थाधिकरणेप्रत्यपादयत्। मिश्रास्तुप्रायेणपुरुषधर्मःप्रयोजकव्यापाररूपैवत्वमौरथो
गच्छतीत्यादावपिगत्यनुकूलचक्रभ्रमणादिरूपास्त्येवेतिनलक्षणेतिभावार्थाधिकरणएवप्रोचुः। सा
चकिंकरोतिपचतिपाकंकरोतीतिचकरोतिसामानाधिकरण्यात्सर्वाख्यातवाच्या। करोतिश्चकिंचिद राम०
साध्यवस्त्वंतरविषयंप्रयोजकव्यापारमेवाह। तस्याश्चसर्वोपरीभूतंसर्वकारकान्वययोग्यंक्रियारू
पमाख्यातेनैवोच्यतइत्यसनन्याख्येयोभावार्थस्तुभयेप्याहुः। यथाकर्मत्वंद्वितीयावाच्यंअतएवध २

टः कर्मत्वमानयनं कृतिरिसयोग्यं वाक्यमाङ्कः क्रिसर्वि विचेतनप्रवर्तनात्मकविध्यवरुद्धा पुरुषार्थरूपं भा
वं विना विध्यनुपपत्तेः पुरुषार्थरूपं भावमवलंबमानानां तस्या निर्ज्ञातकरणत्वादनिर्ज्ञातेतिकर्तव्यताक
त्वाच्च स्वयं शास्त्रीयं सच्छास्त्रीयेण करणेतिकर्तव्यतेन ह्लाति॥ ॥ इत्यर्थभावनानिरूपणं॥ ॥ एतामे
व च भावनां सा साहि विषयीकुर्वतो विधिप्रतिषेधौ तद्द्वारा तु तद्विशेषणानि कारकाणि। तदुक्तं तन्त्राधि
करणे। विशिष्टां भावनां प्राप्य वृत्तिर्विधिनिषेधयोरिति। तत्र विधिः प्रेरणा नियोग इत्येकार्थाः। सैव च श
ऊ ब्दभावनेत्युच्यते। लिङादिरूपशब्दधर्मत्वात्। तदुक्तं भावार्थाधिक[illegible]
रणे। अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते इति। अभिधीय
तेनेनेत्यभिधा लिङादिः शब्दस्तद्धर्मोऽभिधाभावना शब्दभावनेति यावत्। सा च सामान्यतो विशेषतश्चे
प्र वं साध्या। स्वतंत्रपुरुषप्रवृत्तिर्हि धा लोके दृश्यते क्वचित्स्वकृपार्थसुखार्थं प्रवर्तते क्वचिदन्यप्रेरितः आचार्य

बाल॰द्वि॰ ३ प्रेरितोहं गामानयामि न स्वेच्छयेति व्यवहारात्। यथाप्याचार्यादिरप्यनिच्छंतं न शक्नोति प्रवर्तयितुं तथा
पि स्वारसिकेच्छारहितमपि शिष्यादिकं स्वप्रवर्तनाबलेनेच्छामुत्पाद्य प्रवर्तयतीति हेतुविध्योपपत्तिः। तत्र
शब्दश्रवणानंतरभाविन्यां प्रवृत्तावाचार्यादेः स्वप्रवर्तनाज्ञानजन्येन प्रवर्तकत्वमवसीयते। का पुनः प्रव
र्तना प्रवृत्तिहेतुभूतः प्रवर्तयितुर्धर्मः। प्रवर्तयितृधर्मत्वाभावे यज्ञदत्त एव मां प्रवर्तयति न देवदत्त इति
व्यवस्थानुपपत्तिः। प्रवृत्तिहेतुज्ञापकत्वे नतु व्यवस्थोक्तो देवदत्तस्त्वां प्रवर्तयतीति प्रवर्तनाज्ञापनाद्य
ज्ञदत्तस्यापि प्रवर्तकत्वापत्तिः। तथा लौकिकलिङोपि गुर्वादिगताज्ञादिज्ञापकस्य प्रवर्तकत्वापत्तिः। लो
के चाचार्यादेः प्रवर्तयितुर्धर्मोहमेनं प्रवर्तयामीति प्रवर्तयितुर्मानसप्रत्यक्षवेद्यः प्रैषादिरूपो नापह्नो
तुं शक्यते। वेदे तु पुरुषाभावेन लिङादेरेव प्रवर्तकत्वात्तद्धर्मोंगीकार्यः स एव विधिः। तत्रोत्तमप्रवर्तनम एम॰
ध्येषणा। समस्यामंत्रणा। नीचस्य नियंत्रणमाज्ञात्वं एषु च लिङादेरनुशासनाच्छक्तिग्रहः। तत्र नाना ३

र्थत्वपरिहाराय चतुष्टयानुगतमेकं प्रवर्तनात्वं शक्यतावच्छेदकं ईप्सितानीप्सितकर्मणोरिव साध्यत्वं
द्वितीयायामिश्रमते। अत एव हरदत्तः। अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि। तत्रैव लिङ् विधातव्यः किं
भेदस्य विवक्षयेत्याशंक्याह न्यायमुन्नादनार्थं वा प्रपंचार्थं मथापि वा। विध्यादीनामुपादानं चतुर्णामादि
तः कृतमिति। अत्र लौकिकनिमंत्रणादिभ्योन्योन्यस्य लौकिको भेदोस्ति न्यायसिद्ध इति न्यायसिद्ध इति न्या
ना यस्य वचनं न्यायमुन्नादनं। वाच्यतावच्छेदकस्य प्रवर्तनात्वस्याश्रयाइयस्योत्क्रमेपि न लौकिक एवेति स्ववचनं
प्रपंचः। ननु लोडर्थप्रैषातिसर्गयोरपि प्रवर्तनात्वात्कथं चतुरुक्तिः। मैवं। कामचारानुज्ञारूपस्यातिस
र्गस्य कामचारकरणात्मकामंत्रणरूपत्वात्। प्रवर्तनासामान्यस्यैव च प्राप्तविषयत्वविशेषितस्य प्रैषत्वा
त्तत्र तं प्रवर्तनत्वस्मृतिः प्राप्ते प्रैष इत्यभिधीयते। अप्राप्तप्रैषणां सर्वविधित्वं प्रतिपद्यत इति। स्वाध्यायोध्येत
व्य इत्यादौ प्रैषांतःपाति विशेषमृत प्रवर्तनामात्रे लक्ष्यं अप्राप्तप्रवर्तनं च विधिरिति विधात्वते सूत्रार्थार्थः

बाल॰ हि॰ न्यायसुधायां तु शक्तिग्रहोन्यथोक्तः। बुभुक्षितस्य बालस्य रोदनेन स्तनदाने प्रवर्त्तनां ज्ञात्वा स्तनदाने मा
४ तापवर्त्तते। तदासौ तस्या मातुः प्रवृत्तेः कारणं जिज्ञासमानः कारणांतराणुपलब्ध्यास्य प्रवर्त्तनायां कारण
त्वं प्रकल्प्य गामानयेति वाक्यश्रवणानंतरं प्रयोज्यप्रवृत्तिं दृष्ट्वा मात्प्रवृत्तिदृष्टांतेन तस्यामपि प्रवर्त्तना
ज्ञानस्य कारणत्वमनुमाय तत्कारणजिज्ञासायां लिङादिशब्दश्रवणानंतर्यात्तस्यैवान्वयव्यतिरेकाभ्यां
प्रवर्त्तनाभिधानशक्तिं कल्पयतीति। अथ प्रवर्त्तनालक्षणे एवैतेपरकल्पं। तत्राद्यविशेषणेन प्रवर्त्तयितृ
कृतयागादेर्निरासः। धर्मशब्देन च समवेतत्ववाचिना प्रवर्त्तयितृसंबंधिनामपि तदसमवेतानां प्रवर्त्य
लिङ्‌शब्दतदुच्चारणानां निरासः। सर्वस्यापि लक्षणस्य फलेतिव्याप्तिस्तस्य प्रवृत्तिं प्रतिहेतुत्वात्। प्रव
र्त्तयितृगुर्वादिधर्मत्वाच्च। अतः परसमवेतप्रवृत्तिहेतुत्वमत्र विवक्षितं फलं तु प्रवर्त्तयितुरेव प्रवृत्तेर्हेतु रम
र्न परसमवेतप्रवृत्तेरिति नोक्तातिव्याप्तिः। महामुद्गलमहास्वाद्धः। धर्मशब्देनापूर्वनिरासः। प्रवर्त्तयितृ ४

शाब्देनेष्टसाधनत्वयोः। आद्यविशेषणेन निष्ठीवनादीनामिति। तन्न। धर्मत्वाद्येनापूर्वनिरासायोगात्॥
अपूर्वं हि प्रवर्त्यगतं प्रवर्त्तयितृगतं वा। आद्ये प्रवर्त्तयितुरिति षष्ठ्या प्रवर्त्तयितृसंबंधित्वोक्तेः प्रवर्त्यगतस्य चा
पूर्वस्य प्रवर्त्तयितृसंबंधाप्रसिद्धेस्तद्गतातिव्याप्तेः प्रवर्त्तयितुरिति षष्ठ्यंतेनैव निरासात्। द्वितीये प्रवर्त्तयि
तृगतस्यापूर्वस्य प्रवर्त्यप्रवृत्तिप्रतिहेतुत्वाभावेन तद्गतातिव्याप्तेः प्रवृत्तिहेतुरित्यनेनैव निरासादिति। तन्न
हि दं भट्टसोमेश्वरमतं न ह्यभिधाव्यापारस्यैव विधिरूपभावनात्वे बाधकाभावान्निर्मूलत्वात्। तदेतन्मतं मिश्रैः
षष्ठाद्ये शास्त्रदीपिकायामुक्तं अंशत्रयविशिष्टभावनाप्रतिपादनं चास्य व्यापारोऽस्य प्रवर्त्तकस्यार्थप्रति
पादनरूपस्य व्यापारस्य प्रवर्त्तनारूपत्वमिति। यत्तु अस्तु तर्ह्यभिधानात्मको व्यापारोऽस्य प्रवर्त्तकः। न स्वत्वर्थ
प्रतीत्यात्मकार्थज्ञानस्य केवलं। कल्प्यं प्रवृत्तिहेतुत्वं लिङ्गच्यस्येति लाघवमित्याशंक्य शब्दान्तरगताप्यस्ति
न्वभिधास्यात्प्रवर्त्तिका। पस्येर्थतो विशेषश्चेत्तस्यैव स्यात्प्रवर्त्तकः। इति दोषद्वयमुक्त्वा न चास्या अभिधेयत्वा

द्वारं २

बाल·द्वि· द्विशेषः कार्यतोऽगतेः। न युक्तं त्वभिधेयत्वं सर्वासां वा प्रसज्यते। इत्यनेन पूर्वं दोषद्वयोद्धारः पूर्वकमन्यद्दोषद्वय
५ मुक्तान्तद्दैत्वा अथ प्रवर्तनात्वेन कार्यादनवबोधतः। तद्रूपेणाभिधेयत्वं तच्चान्यासु न विद्यते इत्याशंक्य तन्ना
त्त्रा स्यात्त्वभिधानान्न्यायोक्तेः प्रवर्तकरूपता। स्याच्चार्थमभिधेयत्वं नास्ति चेत्स्यादसंसत्तैर्विकल्पदूषणद्वयमुक्तं। ति
तदेतल्लिङः प्रवर्तकत्वं विहाय तदभिधायाः प्रवर्तकत्वे युज्यते· अभिधानं विनापि हि प्रवर्तकस्वभावस्य
लोके आचार्यादेर्वेदे च लिङादेर्व्यर्थमेवाभिधेयत्वं न त्विदं दूषणं लिङः प्रवर्तकत्वेभिधायाश्च प्रवर्तनात्वे
प्रसज्यते। यथा त्वभिधां बुद्ध्वा बोधात्म्य कार्याद् बुद्धापि न प्रवृत्तिहेतुरेवं त्वदभ्युपेतोपि व्यापारोऽग्निहोत्रादौ प्र
वृत्तिं दृष्टामवाकाद्धास्ति कश्चिल्लिङोत्र प्रवृत्तिहेतुर्व्यापार इति सामान्यतोऽवगतोपि न प्रवृत्तिहेतुः अत
स्त्वयाप्यसौ प्रवर्तनात्वेन शब्देन तत्रापि लिङैवाभिहितः तस्य स्वप्रवर्तनात्वनिर्वाहाय स्वविषयस्ये एम०
ष्टसाधनताक्षेपमुखेनेच्छां जनयन् प्रवृत्तौ हेतुर्वा कार्यज्ञानस्य पदाभिहित एव पदार्थ इत्यवश्यमभ्यु ५

पेयं।नच्चैतन्ममापितुल्यमितिनलोमेष्वेवोक्तदूषणावकाशः कश्चित्।तस्माद्वेदेलिङादेरेवप्रवर्तक-
त्वदभिधैवचप्रवर्तनाविशेषः प्रेरणाविधिरितिचोच्यतइति॥ ॥इतिविध्याख्यशाब्दभावनानिरूपणं
॥ ॥निवारणारूपापिशाब्दभावनानिवर्तनारूपसामान्यतोनिवारणारूपविशेषतश्चविधिवदेवप्र-
साध्या।सापिचनिवृत्तिहेतुर्निवर्तयितुर्धर्मरूपाहमेतंनिवर्तयामीतिनिवर्तयितुर्मानसप्रससंवेद्या
प्रवर्तनावत्।सापिचन्यूनोत्तमसमविषयत्वेनत्रेधालोकेषुधर्मोवेदेचपुरुषाभावात्तदान्यायविशे-
षरूपतत्रयासंभवाल्लिङादेरेवनिवर्तकत्वात्तद्धर्मभूताचतुर्थ्यपिविधांगीकार्या।सैवचप्रतिषेधोनि-
षेधइतिचगीयते।लोकेतुतदुभयव्यवहारोविधिव्यवहारश्चोक्तएव।तत्रत्वेतावान्विशेषः।ननिवर्त- व
नायांविधिनिमंत्रणेतिवत्प्रवर्तनायांशक्तियाहकमनुशासनमस्तितथाप्यनादौसंसारेनञुपहित-
लिङादिश्रवणानुविधायिनीप्रयोज्यप्रवृत्तिनिवृत्तिंदृष्ट्वाआवापोद्वापाभ्यांनञुपहितलिङादेर्निवृत्तावे

बाल॰ द्वि॰ ६ वच्छक्तिग्रहे प्रसक्ते गुरुणाहं निवर्तके न निवर्तितो निवर्तेइत्यादि गुरौ निवर्तकत्वव्यवहारान्यथानुपपत्त्या
प्रवर्तनायामिव प्रवर्तकत्वान्यथानुपपत्त्यान व्यापारभजनायां निवर्तनायां शक्तिग्रहो भवतीत्युक्तिस्तोऽत
एवं तङ्गताधिकरणवार्तिको। विधायकैरसंसृष्टो न हि नञ् प्रतिषेधकः। विधिना युज्यते यत्र न हस्यान्नपि
वेदिति। तत्राभावार्थता नैव स्वयं प्रसो रुणाद्धि हीति। अत्र नञो निवर्तनायां शक्तिरुक्ता। नञ्जीकायां तु
प्रतिषेधविधिपरो हि विधायकइत्यादौ प्रसज्यपाठ इति लक्षणा वा। अभेदप्रसंगइत्स्तेनेयं थो विधायकपदे
न लिङः एव प्रतिषेधार्थते सपिपरस उक्तः। तथा च निषेधलिंगविवक्षायां तस्यैवाह्निरूक्तानन्नञः। ये
षांत्विति ग्रंथेतु सर्वमतमप्युक्तं। तत्र नञादेरभावविषयायालिङादेः प्रवर्तनाविषयायाः शक्तेस्सा
म्यस्याविशेषेपि तथा नञादेर्निवर्तनावाचित्वपक्षे तत्समभिव्याहृतलिङादेरागादिप्राप्तप्रवर्तनानुवा राम॰
दकत्वस्य लिङादेश्च निवर्तनावाचित्वपक्षे नञादे [illegible] त्वस्फलीभूतार्थप्रवृत्त्यभावानुवादकत्वस्या ६

6

विशेषेपि अम्नानोनाः प्रतिषेधेऽस्त्यन्वयचतुष्टये शक्तिचतुष्टयं कल्प्यमित्याद्यपक्षे लाघवं। लिङ्लोट्
पंचमलकाराणां तव्यादीनां चानेकेषां कृत्यानां चतुष्टयाधिकशक्तिकल्पनाप्रसंगो रवान्यप्रत्ययशक्ति
कल्पनाप्रसंगोऽयुक्त इति तन्निशक्तेर्वार्तिककृता हि रभिधानेन तत्रादरं स्त्वचयत्नाधुनितमिति॥ ॥ इतिप्र
तिषेधार्थ्यशाब्दभावनानिरूपणं॥ ॥ सेयं द्व्यपि शाब्दभावना प्राशस्त्याप्राशस्त्यज्ञानानुमदीतेव स्वफल
भूतां प्रवृत्तिं निवृत्तिं च जनयतीति तर्हि कर्तव्यता तेनापेक्षते गरलाति चार्थवादैः स्वार्थेनार्थवत्त्वायल म्ना
क्षितं। तस्यापेक्षितकर्तव्यतापेक्षात दन्वयस्यार्थभावनावद्विध्यन्वपाकर्तव्यत्वेन प्रतीतेस्तत एव च भाव्यक
रणयोराकांक्षापूर्वमन्वये स्यात्। नान्यथा। न च शाब्दभावना ज्योतिष्टोमादिप्रातिस्विकविधिवाक्येषु स्वरूप
तः सत्यपि कर्तव्यत्वेन प्रतीयते किं त्वर्थभावनैव अतोऽध्ययनविधौ सा विधीयमानत्वात्कर्तव्यत्वेन प्रतीय
ते। तदुक्तं वार्तिके सा स्वेवं प्रवर्तते इति। व्याख्यातं चाभियुक्तैः। अध्ययनविधिवशात्कार्यत्वेन प्रतीयत इति

शाल· द्वि· ना१ ४ त्युरूपप्र

ननु तत्राख्यातप्रत्ययोक्तार्थभावं वाध्ययनकरणिकाविधीमतेन तु प्रेरणा तस्या आख्यातवाच्यत्वाभा ध्ये
वाल्लिङश्च विधिद्वयानुक्तेः। अत्रोच्यते। न तावत्सक्तुहोमवद्द्वितीयाभंगो त्र प्ररोहितं हणीतरानिवर्तु द्विती
यावत्प्रधानभावं स्वाध्यायं प्रतिगुणभूताध्ययनभावनावगता। ततः संस्कार्यत्वानुपपत्त्यायमेव वि
धिः शास्त्रानुसारेण स्वाध्यायं संभवि निर्दिष्टे विनियुज्यपर्यवस्यतीति तृतीये उक्तं। तत्र विध्यंशे तावदेव दृष्टं
7 तत्र च शब्दानां करणत्वं वा कर्तृत्वं वा निरूप्यत इति वार्तिकात् लोके उभयविवक्षासंभवेऽपि वेदे प्रवर्तयित
पुरुषाभावेन कर्तृव्यापाराख्यातत्वनियतकरणत्वासंभवात्स्वातंत्र्याच्च कर्तृत्वेनैव स्वाध्यायो विनियुज्य
ते। अंतरंगं च कर्तृकारकं क्रियायाः। अत एवाख्याताभिहितासंख्यानभिहितेऽपि कर्तर्येवान्वेतीत्युत्सर्ग
इत्युक्तं कर्त्रधिकरणे। एवं कर्तृतया स्वाध्याये विनियुक्ते थे वा हार्देर्गुणत्वाद्विधायकस्य च प्राधान्यात्स्वात्तिसि राम०
कवाक्यस्यालिङः कर्तृत्वेन विनियुज्यन्ते अध्ययनेनोपात्तान्लिङ्से भावयेयुरिति। ततः किमिसपेक्षितेत्साम। ७

र्थ्याद्देवपुरुषप्रवृत्तिमिति भावयेयुरिति वद्ध्यात्तस्य संबध्यते। श्रुतार्थापत्तिस्थलकश्चायमध्याहार इ
श्री ष्टत्वात्किं तर्हि सादिवत्तात्तदुक्तमर्थवादाधिकरणवार्त्तिके ततः किमित्यपेक्षिते सामर्थ्याद्देवपुरुषप्रव
र्तनमिति संबध्यते इति। तेनेदं श्रुतानुमितैकदेशनिष्पन्नं महावाक्यं भवति अध्ययनसंस्कृताः स्वाध्या
यपदोपात्ताल्लिङः पुरुषप्रवृत्तिं भावयेयुरिति। अयमेव च वाक्यार्थः पारमार्थिकोऽन्यथा शब्दभावनायाः
कार्यत्वानवगमात्तदितिकर्तव्यताभूतस्याध्ययनस्य लक्षणाऽपार्थवादप्रामाण्यं न सिध्येत्। नन्वर्थवादाधि
करण एवाध्ययनस्य चाचार्यैः कर्मस्वर्थज्ञानस्य लैङ्गिकविनियोगात्तदर्थोऽध्ययनविधिरधीतेन स्वाध्याये
न फलवदर्थावबोधं भावयेदितीत्युक्तं तद्धि रूढ्या कर्तृत्वोक्तिः प्रवृत्तिफलत्वोक्तिश्च। तत्रापमुक्तं न तु विरो
धः। शब्दभावनायां हि लिङादीनां कर्तृत्वे सामर्थ्यात्फलवदर्थावबोधे करणत्वं फलितं भवतीति प्रवृत्तिक
र्तृत्वमेवार्थावबोधकरणत्वेन फलितं मा स्यादिति मिथो विरोधः। प्रवृत्तिफलत्वं तु फलवदर्थावबोधद्वा

बाल॰ टि॰ रितिनभावद्वयविरोधः।लिङादिप्रवृत्तिरूपस्यवाकार्थस्ये [illegible] नतयाबोधंकृत्वाप्रवृत्तिंजनयंतिना
न्यथेति।नन्वेवमपिचेतनप्रवर्तनात्माविधिःकथमचेतनोलिङोनियुंजीतेतिचेन्नसत्यं।उपायासत्त्वेप्यु
पेयसत्त्वात्।यथावर्णलोपागमविकाराद्यसत्त्वेपितेनसत्यमेवसाधुत्वंज्ञाप्यते।शिष्टपरिग्रहाद्या
४ तव्याकरणप्रामाण्यात्।एवमिहाप्यचेतनात्तावल्लिङःमांप्रवर्तयतीतिलिङ्व्यापारभूतशब्दभावनाकर्तृ
तांबुध्यते।तद्गतचैतन्यस्यलिङ्यारोपान्नियोज्यत्वमसत्यमेव।तेनोपायेनशब्दभावनाकर्तृत्वंस्वसंज्ञा
प्यतेर्थवादप्रामाण्यात्।तस्याश्चकर्तृत्वमेतदितिकर्तव्यताभूतप्राशस्त्यानपेक्षणात्तल्लक्षणयार्थवाद
प्रामाण्यंनस्यादिति।एवंकर्तृत्वेनावगतायाःशब्दभावनायाःकरणांशस्त्वालोचनयैवविधिज्ञानमे
व।अथकेनेत्यपेक्षितेसर्वसंबंधानुभवापेक्षणाविधिविज्ञानेनेतिसंबंधग्रहणइतिवार्तिकात्।उक्तंचैतत्र
प्रयोगोहिस्वरूपतोभावनयासाध्यःसंस्तस्याःफलोपहितायाःकरणंभवति।एवंविधिज्ञानमपिस्वरूपे

णविधिनाविषयेणसाध्यंतत्रनैवशाब्दभावनायांप्रवृत्तिरूपफलोपहितायांकारणंभवति।केचित्तुसंबं
धस्मरणमेवकारणंविधिज्ञानेतुतद्व्यापारःकरणत्वनिर्वाहकोयागस्येवापूर्वमित्याहुः।लिङोभिधासैव
चशाब्दभावनाभावंचतस्याःपुरुषप्रवृत्तिः।संबंधबोधःकरणंतदीयंप्ररोचनाचांगतयोपयुज्यतइति।अ
त्रप्ररोचनतेनयेतिप्ररोचनामात्रस्तज्ज्ञानंतच्चांगंफलोपकारिप्रयाजादिवत्तज्जन्यंतुप्ररोचनंप्रवृत्तिप्रति
बंधकालस्यभंगउपकारेणगत्वनिर्वाहकःप्रयाजादिजन्यापूर्ववत्प्रयाजइष्टदेवतवद्वात्राप्यवादइतितिस्ते
यः।इतिशाब्दभावनेतिकर्तव्यतानिरूपणं।अथद्वितीयाध्यायार्थकर्मभेदप्रसंगात्सर्वेपिकर्मभेदानिरूप्य
ते।कर्मद्विविधंलौकिकंवैदिकंच।वैदिकमपिकर्मत्रिविधंप्रवृत्तिरूपंनिवृत्तिरूपंउभयरूपंचपर्युदासा
त्मकमिति।तत्राद्यंकर्मद्विविधंक्रत्वर्थंपुरुषार्थंच।तत्रानलेतुलिप्सासूत्रेप्रथमवर्णकेवैदिककर्मणांत्रैवि
ध्यमुक्तंक्रत्वर्थंपुरुषार्थंअध्ययनमाधानंचनक्रत्वर्थंनपुरुषार्थमिति।शास्त्रदीपिकायांतुतत्रैवयज्ञा

बाल दि॰ २ वनात्कथंभावश्रवणार्थं विधीयते न क्रत्वर्थं अन्यकरणं फलं च पुरुषार्थमिति ग्रंथेन द्वैविध्यमेवोक्तं। तदु
रूणामपीष्टं तन्मतं हि तंत्ररत्न एवोक्तमध्ययनस्य पुरुषार्थत्वमिष्टमिति। त्रैविध्ये तु मत्वं इआर्जनवर्णो
केन बाधानवद्भवितुमर्हतीति भाष्यस्य व्याख्यापंचकोक्तार्थे वार्तिके यथाधानं न क्रत्वर्थं न पुरुषार्थमेवं
कस्मान्न भवतीति ग्रंथस्य पूर्वपक्षग्रंथत्वेपि आधानं न पुरुषार्थमिति सिद्धांतवार्तिकं। तन्नु तंत्ररत्नेप्रस
9 ङ्गेणाइआर्जनस्य यथा पुरुषार्थता वगम्यते नैवमाधानस्येत्यभिप्रायं व्याख्यातं। अतो न वार्तिकं किंचित्रै
विध्ये मत्वमस्ति द्वैविध्ये तु मत्वमथ्यातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति सूत्रमेव अत्र हि द्वैविध्यमेव कर्म
णामुक्तं न त्रैविध्यं। भाष्यमप्येवमेव अंगं क्रत्वर्थः प्रधानं पुरुषार्थ इत्यादि। अन्यत्तु ग्रंथव्याख्यात्रैविध्य
दूषणादि च शास्त्रदीपिकाप्रकाशे तु संधेयं। पुनरपि वैदिकं कर्म द्विविधं गुणकर्म प्रधानकर्म चार्थक रम॰ २
र्मापरपर्यायं। तत्राद्यं यथाधानं। द्वितीयं यथाग्निहोत्रादि। क्रत्वर्थमपि द्विविधमारादुपकारकं संनिप

त्योपकारकं च। तत्राद्यमदृष्टार्थमेव यथा प्रयाजाः। संनिपत्योपकारकं तु त्रिविधं दृष्टार्थमदृष्टार्थमुभया-
र्थं चाश्रयिकर्माख्यं। दृष्टार्थमपि द्विविधं भाग्युपयोगसंस्कारार्थं प्रतिपत्त्यर्थं च। तत्र दृष्टार्थं भाग्युपयोगसंस्का-
रार्थं संनिपत्योपकारकं द्विविधं साक्षाद्विनियुक्तसंस्कारार्थं साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारार्थं चे-
ति। तत्राद्यं यथा व्रीहीनवहंतीति। द्वितीयं यथा वत्समालभेतेति। अत एव वत्सस्यैव विनियुक्तदोहांगगो-
दुग्धोपकारकत्वया वत्समालभने सत्त्वेऽपि संस्कारत्वमपि — सोमाधिकरणेऽवदेव। प्रतिपत्तिस्तु त्रिवि-
धा प्रधानोत्तरकाला तत्पूर्वकाला तत्समकाला च। तत्राद्या यथा चात्वाले कृष्णविषाणां प्रास्यतीत्यादिः। द्विती-
या यथा शकृत्स्रविष्यति लोहितं निरस्यतीति। इयं च तुर्थे पश्वालंभात्लोहितशकृतोरकर्मत्वमित्यधिक-
रणे प्रतिपादिता। प्रधानसमकाला यथाग्नेयचोदनया विहिते यागे चतुरवत्तं जुहोतीति होमरूपा प्रतिप-
त्तिः। होमो हि वषट्कृते जुहोतीति विधानाद्वषट्कारोच्चारणोत्तरक्षणेऽध्वर्युणा कर्तव्यः। तस्मिन्नेव च क्षणे।

तोपयोगसंस्कारार्था भाग्युपयोगसंस्कारार्था उपयोग =

वा.ल.टि

यागस्मरणार्थेन वषट्कारेण स्मारितो यागो यजमानेनानुष्ठेयः। तदिदं सर्वं प्रदानाधिकरणवार्त्तिके प्र-
तिपादितं। अदृष्टार्थं सन्निपत्योपकारकं यत्तदपि प्रतिपत्तिवत्त्रिविधं। अतोपयोगसंस्कारार्थं भाव्युपयो-
गसंस्कारार्थमुपयोगसमकालं च। तत्राद्यं यथाऽऽहुतहविर्लिहः शिष्टाचारकल्प्यविधिप्राप्तः। द्वितीयं य-
था व्रीहीन्प्रोक्षतीति। तृतीयं यथा एककपालमपर्यावर्तयञ्जुहोतीति। प्रकृतौ च पर्यावर्तनविधिरदृष्टार्थ
10 एव दृष्टादृष्टोभयार्थमाश्रयिकर्माख्यं यत्तदपि त्रिविधं किंचिद्द्रव्यप्रक्षेपांशेन दृष्टार्थं देवतोद्देशांशेन
त्वदृष्टार्थं यथा स्विष्टकृद्यागः अग्नेः स्विष्टकृतः क्वचिदन्यत्राविनियोगात्। किंचिद्देवतोद्देशांशेन दृष्टा-
र्थं द्रव्यप्रक्षेपांशेनादृष्टार्थं यथोत्तमः प्रयाजः। तत्र हि स्वाहाग्निं स्वाहा सोममित्यादियाज्यामन्त्रलिङ्गा-
त्क्रमेण प्रसमभिव्याहृतानामाज्यभागादिषु प्रधानानामेव देवताः संस्कार्याः। तदेतद्दशमे प्रयाजे च तस्मा- एम.
यत्वादित्यधिकरणे प्रतिपादितं। पशुपुरोडाशयागोऽप्येवमेवेति दशम एव प्रभावपीति चेदित्यधिकर १०

णेमतिपादितं। अत्रेदं चिंत्यते अग्नीषोमीयस्य वपयाप्रचर्याग्नीषोमीयं पशुपुरोडाशमनु निर्वपती।
त्यग्नीषोमदेवतासंस्कारार्थतया विहितः पुरोडाशयागो भाअंगयागाभ्यासार्थ एवोत वपायागाभ्यासा
र्थंपीति। तत्रो एवोतोभयार्थोभयार्थोयं तत्संस्कार्यो या अग्नीषोमदेवताया उभयत्र सत्त्वादित्साध्यः पक्ष
द्वितीयस्तु वपायागाभ्यासार्थ एव। संस्कार्यदेवताया उभयत्र सत्त्वेपि वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजे
तेति वत्सस्याप्यपौर्णमासीं वैमृधमनु निर्वपतीति वच्चवाक्येन वपायागाभ्याससमाम्नायार्थत्वावगमादिति
उच्यते। पुरोडाशयागस्तावद्वाक्यादेवाग्नीषोमदेवतासंस्कारार्थः तत्र वपायागस्य वाक्यादेवाग्नीषोमदे
वतारूपोद्देश्यविशेषणत्वे सत्यंतं चोद्देश्यत्वे वाक्यभेदापत्तिः। बृहस्पतिसवे वैमृधयोः तु नायं दोषः।
नन्वेवं वपायागसंयोगस्य कालार्थत्वेपि प्रकरणादभ्यासत्वापत्तेः पुरोडाशयागः किं न स्यात्। मैवं। सं
निपत्योपकार्यंगात्स्वर्वप्रधानोत्पत्त्यपूर्व एव व्याप्रियते इति हि सार्वत्रिकत्वाच्चिदेवत्वगस्यातद्युत्पन्नस्यैदृम

बाल॰ द्वि॰
११

धानात्सर्वस्यधारणोभ्याम्रियतइतिकल्प्यते।नहिहभाव्यंगयागाभ्यासात्सर्वोऽसमैपुरोडाशयागात्सर्वस्यव्या
पारसंभवेऽपितन्नैवयागाभ्यासात्सर्वधारणोपारकस्यनानसंभवति।तस्मात्पुरोडाशयागोऽपूर्वमप्र
याजवध्यस्यमाणादेवतासंस्कारार्थएवेतिसिद्धं।किंचिदप्यपिकर्मदेवतोद्देशांशेनापिदृष्टार्थंद्रव्यप्रक्षेपां
शेनापिद्रव्यत्यागांशेनैवतुकेवलमदृष्टार्थमि[illegible]साअपिकर्मतांलभतेयथासूक्तवाकेनप्रस्तरंप्रहरतीति
प्रस्तरप्रहरणंसूक्तवाकमन्त्रकाशितेष्टदेवताकत्वनात्तदुद्देशांशेनापिदृष्टार्थोएवंप्रस्तरेजुह्वमासादयतीत्यस
पयुक्तपत्त्रद्रव्यप्रक्षेपांशेनापिदृष्टार्थत्वमागमात्वेनतत्राऽदृष्टार्थमिति।पुनरपिवैदिककर्मचतुर्विधउत्प
त्तिप्राप्तिविकृतिसंस्कारसर्थत्वेन।तत्राद्यंयथाप्रणीताभिः संयौतीतिसंयवनंपुरोडाशपिंडोत्पत्त्यर्थं।यागा
दिचस्वर्गाद्युत्पत्त्यर्थं।द्वितीयंयथादोऽधीति।दुग्धःस्यस्यैवहिदुग्धस्यप्राप्त्यर्थंदोहनं।तृतीयंयथाव्रीहीनवहं रम॰
तीतिवैतुष्यरूपविकारार्थत्वात्।चतुर्थंयथाव्रीहीन्प्रोक्षतीतिअदृष्टरूपसंस्कारार्थत्वात्।पुनरपिवैदिकक ११

र्मचतुर्विधं। प्रकृतिर्विकृतिरुभयात्मकमनुभयात्मकं च। तत्राद्यं यथाग्निहोत्रदर्शपूर्णमासादि। द्वितीयं
यथा मासाग्निहोत्रादि। तृतीयं यथाग्नीषोमीयसवनीयपश्वादि अष्टमेत्वेतदुक्तं दर्शपूर्णमासयोरग्नीषोमी
ये विकृतित्वस्य च सवनीयपश्वादिषु तेषां चैकादशिनाः सुसाकालत्वसाम्यात्तेषां च प्राजापत्याः पशुगणात्वसा
म्यादिति। चतुर्थं यथा दर्विहोमानारिष्टादयः तेषां स्वरूपत्वमष्टमान्त्ये उक्तं। एवं गरुत्मेधायायाप्यपीति। पुनर
पि वैदिकं कर्म द्विविधं नैमित्तिकं काम्यं च। नैमित्तिकमपि द्विविधं नियतनिमित्तकमनियतनियतनिमित्तकं
चानियतनिमित्तकमपि द्विविधं दोषनिर्घातार्थमदोषनिर्घातार्थं च। तत्र नियतनिमित्तकं यथा याव
ज्जीवमग्निहोत्रं जुहोति वसन्ते वसन्ते ज्योतिषा यजेतेति। तत्राद्यं यावज्जीवाधिकरणे प्रतिपादितं। द्वितीयं
तु षष्ठे सोमविघाप्रजन्मराणावाकेन संयोगादिस्वधिकरणे प्रतिपादितं। अनियतनिमित्तकं दोषनिर्घाता
र्थं यथा यो मावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृते ष्टाकपालं निर्वपेदिति यो मावास्यापौर्णमा

बाल॰ वृ॰ १२ सौंवातिपातयेद्वैश्वानरं द्वादशकपालं निर्वपेदिति च दोषनिर्घातार्थत्वादैवैकार्थत्वादनयोः विकल्पो।
द्वादशो माय क्षिनष्ठमैकार्थ्यादिसधिकरणो वक्ष्यते। अनियतमदोषनिर्घातार्थं यथाद्वादश एव समु
च्चयस्तु दोषनिर्घातार्थेष्विति सर्वोपवादार्थेधिकरणे प्रतिपादितं। भिन्ने जुहोतीत्यादि। काम्यमपि कर्म
त्रिविधं ऐहिकफलकमामुष्मिकफलकमनियतफलकं च। तत्राद्यं यथा कारीर्यादिष्टिः कामो यजेतेत्य
12 नेनाभिचरन्यजेतेति जातेष्टिश्च एतत्त्वादिका फलिका। उपस्थितस्य सस्यार्थे वदि वृष्टिः सः काम्यते नानु।
पस्थिते हि कस्तस्यार्थोपि किमुत जन्मान्तरीयस्य स्यार्था। एवमभिचारेण्युपस्थितशत्रोरेव काम्यते ना
नुपस्थितस्यैहिकस्यापि किमुत जन्मान्तरीयस्य। एवं स्तत्त्वाद्यपि यो यदा जायते पुत्रस्तस्यैव काम्यते न
कालान्तरजातस्यैहिकस्यापि किमुत जन्मान्तरीयस्येति। आमुष्मिकफलकं यथा स्वर्गार्थोग्निहोत्रा रम
दि। न हि स्वर्गः केवलसुखात्मको मानुषशरीरेण सुखदुःखोभयभोगार्थे धर्माधर्मोभयारब्धेनानुभ १२

वितुं शक्य इति। अनियतफलकं यथा चित्रया यजेत पशुकाम इत्यादि पश्वादि हि फलमैहिकामुष्मिकत्वे
नानियतमिति चतुर्थे योगसिद्ध्यधिकरणे प्रतिपादितमिति॥ निवृत्तिरूपमपि कर्म द्विविधं क्रत्वर्थं पुरुषार्थं
च। तत्राद्यं यथा नातिरात्रे षोडशिनं गृह्णातीति। द्वितीयं यथा न हिंस्यात्सर्वा भूतानीति। प्रवृत्तिनिवृत्त्यात्मक-
तयोभयरूपं पर्युदासात्मकं यत्कर्म तदपि द्विविधं क्रत्वर्थं पुरुषार्थं च। तत्राद्यं यथा यजतिषु ये यजामहं करो-
ति नानुयाजेष्विति। नार्षेयं वृणीते न होतारं वृणीत इति च। द्वितीयं यथा नेक्षेतोद्यन्तमादित्यमिति॥ ॥
इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरभट्टनारायणात्मजभट्ट
शंकरकृते मीमांसाबालप्रकाशे सकलकर्मभेदनिरूपणं॥ ॥ संख्याधिकरणे सप्तदश प्राजापत्यान्प
शूनालभत इत्युदाहरणे एकस्यैव द्रव्याद्येकादशावरानगणस्य प्रापकोपस्थोदकत्वद्वारा कर्मभेदः
प्रतिपादितः। एवं च यत्र चोदको नास्ति तत्र तदपवादः। यथा नवमोपान्त्ये अश्वमेधे श्रुतमाश्वानायपारस्व

१३ बाल·दि

तश्चालभतेनाम्यर्येग्निकृतानारण्यानुत्सृजतीत्युदाहृत्यप्रतिपादितं।तान्पर्यग्निकृतानितिगुणा
वाक्येनतद्धागणीतिविधानादपूर्वत्वमिति।ननश्चत्वदुयाघेकादशावदानगणप्रापकस्यचोदक
स्याभावादेकएवयागोनेकपशुद्रव्यकः प्राजापत्येषुसर्वेषुस्यादित्यांसुविशेषलत्रालंभविश
नाद्यभावाद्धयात्त्वदुयाघनिष्कार्षेवकृत्वारएवपश्ववयविनोदेवतोद्देशेनसाम्यादिति।नत्त्वंस
र्वप्रदानाधिकरणेमिश्रः। सागमात्रेणाहोमाभावेपिपर्यग्निकृतानारण्यानुत्सृजतीतिवद्देवता
13
संबंधोपपत्तेरिति।अनश्चतस्त्राधिकरणेन्यायपू[illegible]कं।देवप्रतानितत्राणि।कन्दर्पपत्नीवमेकं।प्रा
जापतेत्त्वदयमेकं।अनद्रुद्भुतमेकं।महाहविषाकीर्सानिनवमत्त्वाभृतमेकं।धर्मचोचनमेकं।आ
दित्सयात्मेकं।उद्वर्णेचनमेकं।इत्यनंसंस्कारएकमिति॥ ॥इतिश्रीमत्सर्ववाक्यप्रमाणपारावार
पारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृतेमीमांसा

सुधाकृतारणेपशुयोर्यागभेद उक्तः सम्प्रांत्यैवेत्युपेक्षितव्यः। एवं सति केचिदाक्षिपंति। एकादशे पंच
शारदीयास्तथेति चेदिसत्त्वोदाहृतं वै शारदमुमावास्यायां सप्तदश मारुतीस्त्रिवत्सा उपाकरोति
सप्तदशपृश्नीनुक्ष्णस्तान्पर्यग्निकृतानितरांश्चालभंते प्रेतराननुत्सृजंतीति। तत्र च सिद्धांतितं पर्यग्नि
कृतवाक्येन तदंतांगरीति विधिः उत्सवाक्ये च मारुतपदानुषंगेण सप्तदशोत्सयागा विधीयंत इति
त्रिवत्सायागैः सप्तदशभिः सह चतुस्त्रिंशत्कर्माणीत्यकंतरदुपपन्नं। अत्रापि त्वत्सवाक्ये एक एव या
गः प्राप्नोति तदंतांगरीति विधिनारणपवद्वादकाभावेन प्राजापत्यस्थायाभावादिति। अत्र ब्रूमः। उत्सवा
क्ये आम्नाताश्रवणात्त्रिवत्सावाक्यश्रुतमुपाकरोतीत्यनुषज्यते तद्वत्तत्रानेककर्मविधायीत्युत्सवाक्ये
नुषज्यमानमवैरूप्यायानेककर्मेव कर्म विधत्ते अन्यथा सकृदाम्नातमुपाकरोतीत्याम्नातं त्रिवत्सावाक्ये
सप्तदशकर्माणि विधत्ते उत्सवाक्ये चैकं कर्म विधत्त इति वैरूप्यमापद्येत इति॥ ॥इति संख्याधिकरणं

14

न्यायविषयाविषयविवेकनिरूपणं॥ ॥द्वितीयेइंद्रियकामाधिकरणेगुणफलसंबंधउक्तः।तदपेक्षितस्य
त्वाश्रयस्यलक्षणमुक्तंफलायविधायमानोगुणोयत्रकारकतामापद्यतेसआश्रयइति।तदिदमव्याप
कंज्योतिष्टोमेकाम्योक्थ्यादिसंस्थाश्रयत्वेनमीमांसकाभिमतोनखलुक्थ्यादिसंस्थायांफलार्थंक्रियमाणा
यामपिज्योतिष्टोमेसाकारकाभवतिकिंतुसोमएव।अतःफलायविधायमानोगुणोयांक्रियामपेक्षते
सआश्रयइत्येवाश्रयलक्षणमभिमतं।संस्थाचसमाप्तिरूपत्वात्समाप्तिमंतमपेक्षते।अतोऽस्यैवेदंलक्ष
णमुक्थ्यादिसंस्थाश्रयमतेज्योतिष्टोमइतिनाव्याप्तिः॥ तथाफलार्थोगुणोयत्रकारकमित्याश्रयलक्ष
णंसाकंप्रस्थाय्येऽङ्गंभीसाहितंफलार्थोगुणोनप्रकृतेआश्रयत्वेनसंमतेमावास्यायागेदधिदुग्धक
रणकेकारकतामापद्यतइतितत्राप्यव्याप्तिःअतोऽप्युक्तमेवलक्षणमाश्रयस्ययुक्तमितितथारेवस एम०
धिकरणेक्रियाकारकभावव्यतिरिक्तेनापिसमानकर्तृकतासंबंधेनाश्रयाश्रयिसंबंधयोगेनसहरे १४

वंतीवा। वंतीयसंबंधकारणस्य फलायविधीयमानस्य गुणस्यांशे क्रियाकारकभावव्यतिरिक्तसंबं-
धांतरेणाश्रयाश्रयिभावो न संभवतीति नोत्तरितं किंतु तत्संभवमंगीकृत्यैवान्यदेवोत्तरं दत्तं। एवमप्य
ग्निष्टोमः सामेति नावकल्पत इति। तस्माद्द्रव्यस्य द्रुक्रमेवाश्रयलक्षणमभिमतं लक्ष्यतेन फलार्थगुण
स्यतत्रकारकत्वमिति॥ इत्याश्रयलक्षणनिरूपणं॥ ॥प्रकरणान्तराधिकरणे पंचविधमनुपादेयमु
क्तं देशः कालः फलं निमित्तं संस्कार्यं चेति। अनुपादेयसंनिधिसचिवस्यासंनिधिः प्रकरणान्तरमिति
प्रकरणान्तरलक्षणमुक्तं सर्वत्र तथैव। तत्र वारुणानिष्कासेन तुषैश्चावभृथं यंतीत्यत्राव्याप्तं। तत्र –
प्रकरणान्तरेणेव भेद उक्तो वार्तिके प्रकरणान्तराधिकरण एव। शास्त्रदीपिकायामपि मतमेतथावभृथ
सोमादिस्वधिकरणे उक्तं यंतीत्यनेन प्रकरणान्तरन्यायेन कर्मान्तरं विधीयत इति। अत्र – हृदि सोमस्या
समाहृधेः असंवेवाक्तलक्षणांतत्र वारुणीनिष्कासस्य तुषाणां चाप्रतोपयोगित्वेन संस्कार्यतयानुपा

देयत्वादिति। न दृष्टं तेन तृतीययानुपनिष्कासस्य साधनत्वोक्तावपि निष्कासस्य वारुण्यामिक्षात्वोषत्वा
नुषाणां चाग्नेयादियागशेषत्वाद्यत्तिं चित्सोमत्रिमंस्याजेनावभृथं यन्नातिवत्प्रयाजशेषेणाहंवीष्य
भिघारयतीतिवमतिपाद्यत्वरूपसंस्कार्यत्वाविरोध इति। तन्मंदं। अधिकरणाविरोधात्। एकादेशेत्य
स्मिन्नेव वाको स्तवनीयवत्प्रचारविप्रकर्षं एवं पक्षविधांतरेणानिरस्यप्रतिपत्तिरितिश्चर्वपक्षांतरं
नुषनिष्कासास्य संस्कार्यद्वयोद्देशाद्वाक्यभेदापत्तेर्निरस्यार्थकर्मत्वमेवोक्तं। अत एवं प्रकरणांतरत्व
स्रणांवाच्यं। नात्रासंनिधिरिवस्वरूपतोनुपादेयसंनिधिः प्रवेशः किंतु तत्कार्यविधेरूपपदार्थसंक्र
मासंभवः। स च यथानुपादेयसंनिधिनाभवस्येवमुपादेयद्वयसंनिधिनापि भवति। तस्माद्विधेरूप
पदार्थसंक्रमासंभवेन सह कृतोऽसंनिधिः प्रकरणांतरमिति प्रकरणांतरलक्षणमभिप्रेतं। अत एम
एव विश्वजित्वायजेतेसादौ यत्रोपपदार्थो विधेयो नास्त्येव नामधेयमात्रश्रवणात्तत्रापुपप 

दसंक्रमासंभवसहकृतादसंनिधेरेवभेदइत्यवधेयं। अतएवोद्भिदादीनामप्येवंचैवमादीनांभेदइति
संनिधवेवनाम्नाभेदउक्तः एवमप्येष ज्योतिरित्यादावपि। अष्टमन्त्रतीयेच जनकसप्तरात्रप्रकरणाम्ना
तेचत्वारित्रिवृत्संसहस्रामग्निष्टोमसहस्राणीतिवाक्येचतुःसंख्यात्रिवृत्त्वरूपानेकोपादेयगुणाश्रवणात्तु
षनिष्कासवाक्यवत्प्रकरणान्तरन्यायेनैवभेदोभ्युपगतः। अतएवचप्रकरणान्तराधिकरणेमासमग्नि
होत्रंजुहोतीत्यादावनुपादेयवतिवाक्येउपसद्भिश्चरित्वेतिगुणान्तरोपादानात्स्वरूपतःसन्निपिवाक्यभेद
सिद्धान्तसिद्ध्यनुपयोगित्वादनुपादेयगुणाद्यश्रुतवाक्याभिप्रायेणैवसिद्धान्तहेतुतयोक्तोभाष्ये। आघा
येष्वमांस्यादिवाक्येष्वेवतस्यसिद्ध्युपयोगोद्भाषितोनसार्वत्रिकइतिध्येयं॥ ॥इतिप्रकरणान्तरनिष्कर्षनि
रूपणं॥ ॥अथमासमग्निहोत्रंजुहोतीत्यत्रकर्मभेदेनैयमिकाग्निहोत्रवत्कर्माभेदोवेतिचिन्त्यते। तत्र
पूर्वपक्षः। तिस्रआहुतीर्जुहोतीत्यादावयंन्यायःस्थितः यत्रगुणाद्ययेनोत्पविरुद्धकर्मोत्पत्तिवाक्योपा

बाल॰ टि॰ पात्रे भेदाद्द्रोऽस्मन्नराक्षेपमंतरेण कर्मान्वयोनुपपन्नस्तत्र भेद एवावसिप्यते नाहत्तिरिति। मासाग्निहोत्र
१६ वाक्ये च नामातिदेशेन परस्परविरुद्धं सायंप्रातः कालद्वयं कर्मोत्पत्तिवाक्यगतमस्ति तेन कर्मभेद एवावसि
ष्यते यद्वाग्नेयोऽष्टाकपाल इत्यत्र पौर्णमास्यमावास्या कालद्वयेनैवेति। अत्रोच्यते। नामातिदेशेनांगत्वावि
16 शेषादमावास्योपि कालद्वयवत्त्वात्सम एवानंतश्चोपात्ते नाम्नासे नैव कालद्वयान्वयोपपत्तेर्नैककर्मभेदाक्षेपः।
तिस्र आहुतीर्जुहोतीसादोतु नैव केनचिच्छब्देनाभ्यासउपात्तो यतस्तेनैव त्रित्वसंख्योपपन्नासादतस्त
दुपपत्तेः कर्मभेद एवावसिप्यते एवमाग्नेयवाक्येपीति दृष्टांतद्वयवैषम्यं॥ ॥अथैतान्नामिदं चिंत्यते। मासं
दर्शपूर्णमासाभ्यां यजेत इत्यत्राज्यभागौ यजतीति वद्वित्वसंख्यया कर्मभेदात् कर्मणी यजिना विधीये
ते इति तावद्विवादः। तथा दर्शशब्देन पूर्णमासशब्देन च प्राकृताग्नेयादित्रयसंबंधि इति कर्तव्यतात्र राम॰
यमेकैकेन शब्देनैकैकस्मिन्कर्मण्यपतिदिश्यत इत्यपि विवादः। अथ परस्परविरुद्धद्रव्यदेवतादिरूपेति १६

कर्तव्यतायास्त्वयं तु यं उत्पत्तिवाक्यगतं एकैकस्य कर्मणो भेदमाक्षिपतीति न वेति चिंत्यं । तत्र सर्वे प्रसः । य
घपत्र मासमग्निहोत्रं जुहोतीसत्रेवाभ्यासोपादानं नास्ति तथापि विधेयताधिकरणो इति कर्तव्यताद्वय
समुच्चयनिरासाय यथा सौर्ये प्राकृताग्नेयकर्मभेदेपि तदीयपौर्णमास्यमावास्यादि विरुद्धेति कर्तव्यत
योर्विकल्पे नास्ति देश एव मिहापि विनिगमकाभावाद्दर्शशब्देन पौर्णमासशब्देन च तिस्रस्तिस्र इतिक
र्तव्यताश्चाग्नेयादित्रयसंबंधिन्यो तिदिष्टा विकल्पेनैकस्मिन्कर्मणि निवेक्ष्यंत इति न कर्मभेदः । षोढा किं
तु द्वैधं वेति ॥ अत्र क्रमः । इति कर्तव्यताविकल्पोप्यष्टमाद्ये निरस्त एव तथापि मासं दर्शपौर्णमासाभ्या
मिसत्र दर्शशब्देन पौर्णमासशब्देन चैकैकेन लक्षणोसेक शब्दोपादानात्समुच्चयेन साग्नेयवाक्य
मुदाभुदितत्वात्षट्कर्मणः । सौर्ये तु प्राकृताग्नेयेति कर्तव्यतयोर्न प्रसक्तेकशब्दोपादानमस्तीये
न समुच्चयस्तद्वत्ता च कर्मभेदः स्यात् किंतु तत्रैकेति कर्तव्यताकांक्षावशाद्वद्कल्पनाएकेति कर्तव्य

१ बा.ल.दि नयेव चाकां सोपदशाम्यतीतीदृगवातिदेशकः शब्दः कल्प्यते पौर्णमास्याग्नेयवद् दर्शाग्नेयवद्वेति। ए
वं वा शब्दस्य प्राप्तातिदेशकशब्दकल्पनानन्नप्राकृताग्नेयेतिकर्तव्यतयोः समुच्चयो न वा न द्वन्द्वात्कर्मभे
17 दापत्तिरिति वैषम्यं॥ नन्विह यथा पौर्णमासशब्देन दर्शशब्देन वा कर्मत्रयकर्मत्रयसंबंधीतिकर्तव्य
तात्रयं लक्षणया निर्दिश्यते। इतिकर्तव्यतायाश्चत्रयस्य त्रयस्यैकैकशब्दोपादानात्समुच्चयावगते
षट् कर्माणि एवं सान्नाय्ययागद्वयेन सद्यःप्राक्तोमाहैकस्मिन्कस्मैं ऐन्द्राग्नस्यापि द्रव्यदेवतारूपेतिकर्त
व्यतापि प्रकृतिस्थादर्शशब्देन लक्षणयैकशब्दोपात्तैवेति समस्तमपि कर्म मासदर्शपौर्णमासवाक्य
विधीयत इति षट्कर्मानुष्ठानं याज्ञिकानां विसमेव। प्रकृतावैन्द्राग्नविकल्पेपीहतादिति कर्तव्यताया
अप्येकशब्दोपादानेन समुच्चितस्य विधानात्। तत्रत्वियमान्विशेषः प्रकृतावैन्द्राग्नः प्राक्तोमात् इन्द्रमुत एम०
द्धिकृतावपि सत्रस्य सोमोत्तरकालत्वात्तदंगत्वेंगगुणविरोधन्यायेन समप्राधान्येन तुम्यसंस्था ७

त्स्वधर्मत्वमितिन्यायेनसोमप्राप्तबाधइति।ससंसप्तमंकर्मैन्द्राग्नविकृतिभूतंसिध्यतितस्यतुनिस्व
दनुष्ठानेदर्शशब्दनाम्नातिदिष्टस्यप्रकृतिवद्भावस्यबाधःस्यात्।ततथाचैकादशेवारुणपानिष्कासेनतुषे
ष्वावभृथंयंतीत्यत्रप्रकरणांतरात्कर्मांतरत्वेपिनतत्प्रतिपत्तिरर्थकर्मभूतसोमिकावभृथवद्भावबाधाप
त्तेरित्युक्तं।अतःषट्कर्मानुष्ठानंयाज्ञिकानांप्रक्रममेवेति।ननुसमुच्चयावगमकोपदेशेनप्रकृतिवद्भावा
तिदेशबाधोस्तु।मैवं।प्रकृतिवद्भावेनहिप्रधानांगविकल्पोतिदिष्टः।समुच्चयस्तुवैकृतेप्रधानेकल्प्यःश्रुत
स्त्वितिकर्तव्यतायामंगे।तत्रचांगगुणविरोधन्यायादोपदेशिकोपिसमुच्चयआतिदेशिकेनापिविकल्पे
नबाध्यतइतिप्रकृतिवदेवानुष्ठानंसिद्धं॥ ॥इतिमासाग्निहोत्रमासदर्शपूर्णमासवाक्ययोःकर्मभेदा
भेदविचारः॥ ॥शाखांतराधिकरणवार्त्तिकेउदितानुदितहोमयोस्तथाग्नीषोमीयैकादशकपालद्वा
दशकपालयोःशाखांतरीययोःसमविकल्पःसर्वोप्यतीत्युक्तं।तत्परमतंनस्वमतं।श्रुतिलिंगाधिकार

बाल० द्वि० णोनेकविधबाधनिरूपणोस्वयमेववार्त्तिककृतापरशाखाविहितंस्वशाखाविहितेनबाध्यतइत्युक्तं।यु
१८ क्तंचैतत्।स्वशाखाविहितज्ञानस्यस्वाध्यायाध्ययनजनितस्यकर्मांगत्वात्तत्संभवेइतरस्यानाक्षेपात्।स्व
शाखाविहितविरुद्धवैकल्पिकानुष्ठानेनापिचसाद्गुण्यसंभवात्।स्वशाखाविहिताविरुद्धवैकल्पिकस्य
18 तुज्ञानंशाखांतराध्ययनजनितमपिकर्मणास्वसाद्गुण्यायाक्षिप्यतएव।एतन्न्यायमूलकमेवेदंभविष्य
त्पुराणवचनं-यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्।विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकंयथे
ति॥ ॥इतिशाखांतराधिकरणनिष्कर्षनिरूपणं॥ ॥समाप्तश्चाद्वितीयाध्यायार्थः

मीमांसा
३८५

एम०
१८